वार्षिकः पाठ्यक्रमः
सत्रम् 2018–19
कक्षा – अष्टमी
विषय : संस्कृतम्
(प्रतिभा–समूहः)

**प्रथम–सत्रस्य पाठ्यक्रमः**

| |
|---|
| **वर्णविचारः** – वर्णसंयोजनम्, वर्णविन्यासः<br>**प्रथमः पाठः – ''सुभाषितानि''।**<br>❖ सस्वरगायनम् अनुवाचनं च।<br>❖ शब्दार्थज्ञानं, लिङ्गज्ञानं श्लोकार्थज्ञानम् च।<br>❖ श्लोकाधारितप्रश्नोत्तराणाम् अभ्यासः, अभ्यासकार्यम्।<br>❖ श्लोके आगतानां कर्तृपदानां, क्रियापदानां, पर्यायपदानां विलोमपदानां च चयनम्।<br>❖ नैतिक–मूल्यानां निर्देशः।<br>(अधिगमसम्प्राप्तिः – श्लोकोच्चारणाभ्यासः, महापुरुषाणां प्रकृतिः, साहित्यस्य महत्त्व–विषये जानन्ति) |
| **द्वितीयः पाठः – ''बिलस्य वाणी न कदापि मे श्रुता''**<br>❖ आदर्शवाचनम्, अनुवाचनम्, काठिन्यनिवारणम्, शब्दार्थज्ञानं, लिङ्गज्ञानम् अभ्यासकार्यम् च।<br>❖ संख्याज्ञानम् – एकतः शतपर्यन्तम्। श्रुतलेखनम्।<br>❖ पाठे आगतानां कर्तृपदानां, क्रियापदानां, अव्ययपदानां, पर्यायपदानां विलोमपदानां च चयनम्।<br>❖ अव्ययपरिचयः – अद्य–ह्यः, श्वः–कुतः, उपरि, अत्र–तत्र–कुत्र।<br>यथा – अद्य सोमवासरः। श्वः मंगलवासरः। ह्यः रविवासरः। कदा सोमवासरः? (प्रश्नोत्तराभ्यासः)।<br>❖ नैतिक– मूल्यानां निर्देशः।<br>(अधिगम सम्प्राप्तिः – छात्राः लघुवाक्यरचनाभ्यासे निपुणाः भवन्ति।) |
| **तृतीयः पाठः – ''डिजीभारतम्''**<br>❖ आदर्शवाचनम्, अनुवाचनम्, शब्दार्थाः सरलार्थाः अभ्यासकार्यम् च।<br>❖ प्रत्यक्षरूपेण चित्रमाध्यमेन वा संङ्गणक–चलदूरवाणी–यन्त्राणां प्रयोगं दर्शयित्वा शिक्षणम्।<br>❖ नूतनशब्दपरिचयः अर्थज्ञानम् वाक्यप्रयोगश्च।<br>❖ अनेकशब्दानां कृते एकशब्दनिर्माणम् – जिज्ञासा, चिकीर्षा, पिपासा, ..........।<br>❖ तुमुन् प्रत्ययस्य सामान्यपरिचयः पदनिर्माणम् च। |

| |
|---|
| (अधिगमसम्प्राप्तिः – छात्राः आधुनिक–यन्त्राणां विषये जानन्ति। तुमुन् प्रत्ययं संयोज्य पदनिर्माणे च समर्थाः भवन्ति।) |
| **चतुर्थः पाठः – ''सदैव पुरतो निधेहि चरणम्''।**<br>❖ सस्वरगायनम्, भाव–अवबोधनम्, अभ्यासकार्यम्।<br>❖ शब्दरूपाणि – देव, नर, लता, अस्मद्, युष्मद्।<br>❖ सर्वनामशब्दरूपाणि – किम्, तत्, एतत्, त्रिषु लिङ्गेषु<br>यथा – एषः बालकः। एषा बालिका। एतत् पुस्तकम्। इत्यादयः।<br>❖ धातुपरिचयः – कृ, भू, दृश्, लिख्, पठ् पञ्चलकारेषु वाक्यप्रयोगः<br>❖ नैतिकमूल्यानां निर्देशः।<br>(अधिगम सम्प्राप्तिः – श्लोकानां सस्वरगायनं जानाति। पुल्लिङ्गः – स्त्रीलिङ्गः – नपुंसकलिङ्गःशब्दरूपाणां प्रयोगे समर्थाः भवन्ति। ) |
| **पंचमः पाठः – ''कण्टकेनैव कण्टकम्''।**<br>❖ आदर्शवचनम्, अनुवाचनम्, भाव–अवबोधनम्। अभ्यासकार्यम्, नैतिकमूल्यानां निर्देशः।<br>❖ अव्ययपरिचयः – अद्य–ह्यः, श्वः–कुतः, उपरि, अत्र–तत्र–कुत्र।<br>यथा – अद्य सोमवासरः। श्वः मंगलवासरः। ह्यः रविवासरः। कदा सोमावासरः? (प्रश्नोत्तराभ्यासः)।<br>❖ सन्धिज्ञानम् – दीर्घ–गुण–यण्–अयादि।<br>मम परिचयः, अस्माकं विद्यालयः, संस्कृतभाषायाः महत्त्वम् इत्यादिविषयेषु पञ्च–पञ्चवाक्यानि लेखनीयानि।<br>ऋकारान्त मातृ–स्वसृ–पितृ–वक्तृ सदृशशब्दानां प्रथमा–तृतीया–सप्तमी–विभक्तिषु त्रिषु वचनेषु अभ्यासः प्रयोगः च।<br>गम्–कृ–पा–खाद्–लिख्–पठ्–हस्–ज्ञा–भू इत्यादीनां धातूनां क्त्वा–तुमुन् प्रत्यययोः अभ्यासः।<br>प्रत्यक्षपद्धति द्वारा पठति–पठित्वा, लिखति, लिखित्वा इत्यादयः।<br>पुस्तकं पठित्वा लिखति। पत्रं लिखित्वा हसति।<br>फलं खादित्वा आगच्छति। पठितुं विद्यालयं गच्छति।<br>द्रष्टुं मन्दिरं गच्छति। भ्रमितुम् इच्छति। पठितुम् इच्छति। गन्तुम् इच्छति।<br>❖ (अधिगमसम्प्राप्तिः – भाषिकक्षमता–लेखनक्षमतयोः वृद्धिः भवति) |
| **षष्ठः पाठः – ''गृहं शून्यं सुतां विना''**<br>❖ संवादशैल्या आदर्शवाचनम्।<br>छात्राः पात्ररूपेण कक्षायां पाठस्य नाट्याभिनयं करिष्यन्ति।<br>❖ शब्दार्थाः, सरलार्थाः अभ्यासकार्यम् च।<br>❖ प्रथमातः तृतीयाविभक्तौ परिवर्तनम्<br>बालः – बालेन, छात्रः – छात्रेण, लता – लतया, बालिका – बालिकया |

| |
|---|
| लक्ष्मी – लक्ष्म्या, पुत्री – पुत्र्या, लेखनी – लेखन्या, फलम् – फलेन<br>मित्रं – मित्रेण<br>❖ विशेषण–विशेष्यपरिचयपूर्वकम् अभ्यासः, चयनम् मेलनम् च।<br>❖ (अधिगमसम्प्राप्तिः – नारीजागरूकता सशक्तिकरणम् च। तृतीयाविभक्ति–प्रयोगे निपुणाः भवन्ति) |
| **सप्तमः पाठः – ''भारतजनताऽहम्''**<br>❖ सस्वरगायनम् अभ्यासकार्यम् च।<br>❖ श्लोकार्थज्ञानं शब्दार्थज्ञानं, लिङ्गज्ञानञ्च।<br>❖ श्लोकाधारितप्रश्नोत्तराणाम् अभ्यासः।<br>❖ श्लोके आगतानां कर्तृपदानां, क्रियापदानां, पर्यायपदानां, विलोमपदानां, विशेष्य–विशेषणपदानां च चयनम्। नैतिक–मूल्यानां निर्देशः।<br>(अधिगमसम्प्राप्तिः – भारतपरिचयः, स्वदेशाभिमानः च। विशेषण–विशेष्यज्ञानम् जानन्ति।) |
| अपठित अवबोधनम् – एकपदेन, पूर्णवाक्येन यथानिर्देशं वा प्रश्नोत्तराणाम् अभ्यासः।<br>❖ अनुप्रयुक्तव्याकरणम् – कारक परिचयः। विभक्तिप्रयोगस्य सामान्यनियमाः।<br>❖ उपपदविभक्तिपरिचयः।<br>अभितः, परितः, सर्वत्रः, सह, साकं, समं, सार्धम्, अलम्, नमः, स्वाहा, स्वधा, धिक्, प्रति, विना।<br>यथा – शिक्षकं परितः छात्राः सन्ति।<br>(अधिगमसम्प्राप्तिः – भाषिकक्षमतायाः वृद्धिः आत्मविश्वासश्च।) |
| ❖ प्रथमसत्रस्य पाठ्यक्रमस्य पुनरावृत्तिः।<br>❖ आदर्शप्रश्नपत्रस्य अभ्यासः परिचर्चा च।<br>❖ प्रथमसत्रस्य परीक्षा। |

## (प्रतिभा–समूहः)

## द्वितीयसत्रस्य पाठ्यक्रमः

| |
|---|
| **नवमः पाठः – ''सप्तभगिन्यः''**<br>❖ संवादशैल्याम् आदर्शवाचनम्, अनुवाचनम्, अभ्यासकार्यम्, नैतिकमूल्यानां निर्देशः।<br>❖ तुमुन् प्रत्ययप्रयोगः – प्रकृतिप्रत्ययविभागः।<br>❖ पदस्तरे अभ्यासः – पठ्, गम्, हस्, लिख्, खाद्, दृश्, खेल्, चल् इत्यादीनां धातूनां तुमुन् प्रत्ययेन संयोज्य मौलिकाभ्यासः करणीयः।<br>❖ वाक्यस्तरे अभ्यासः –<br>❖ बालकः (पठ् + तुमुन्) इच्छति। – बालकः पठितुम् इच्छति। |

❖ युवकः(खाद् + तुमुन्) इच्छति। युवकः खादितुम् इच्छति।

❖ एवमेव विंशति–वाक्यानां मौखिकाभ्यासः लिखिताभ्यासश्च।

(अधिगमसम्प्राप्तिः – छात्राः तुमुन् प्रत्यय–प्रयोगे समर्थाः भवन्ति।)

**दशमः पाठः – ''नीतिनवनीतम्''**

❖ सस्वरगायनम्, श्लोकान्वयः, शब्दार्थविवेचनम्, भावस्पष्टीकरणम्।

❖ श्लोकाधारितप्रश्नोत्तराणामभ्यासः

❖ श्लोके आगतानां कर्तृपदानां क्रियापदानां पर्यायपदानां विलोमपदानां विशेषण–विशेष्यपदानां च चयनम्। नैतिकमूल्यानां निर्देशः।

(अधिगमसम्प्राप्तिः – सदाचारस्य ज्ञानं प्राप्नोति। छात्रः सत्यमार्गरतः शिष्टः अभिवादनशीलः आज्ञाकारी च भवति। श्लोकार्थव्याख्याने समर्थः भवति। नूतनशब्दान् ज्ञात्वा तेषां वाक्यप्रयोगे समर्थः भवति।)

**एकादशः पाठः – ''सावित्री बाई फूले''।**

❖ अभ्यासकार्यम्। नैतिकमूल्यानां निर्देशः।

❖ विशेष्य–विशेषणशब्दानां मेलनम्।

❖ कथालेखनम्, संवादलेखनम्, चित्रवर्णनम्।

❖ 'तत्' इति सर्वनामशब्दस्य त्रिषु लिङ्गेषु सर्वविभक्तिषु च प्रयोगः अभ्यासश्च।

(अधिगमसम्प्राप्तिः – वाक्यनिर्माणक्षमतावृद्धिः।)

**द्वादशः पाठः – ''कः रक्षतिः कः रक्षितः''।**

❖ संवादशैल्याम् आदर्शवाचनम्। अनुवाचनम्।

❖ भाव–अवबोधनम्। अभ्यासकार्यम्।

❖ नैतिकमूल्यानां निर्देशः।

❖ 'पर्यावरणम्' विषये पञ्चवाक्यानि लेखनीयानि।

❖ प्लास्टिकनिर्मितवस्तूनां संस्कृतभाषायां नामानि लेखनीयानि।

❖ पञ्चाशत् आरभ्य शत्पर्यन्तं संख्याभ्यासः।

❖ अनुप्रयुक्तव्याकरणम् – संधि–प्रत्यय–उपसर्गः।

❖ कारकाणि आधृत्य वाक्यरचनाभ्यासः।

❖ पत्रलेखनम्।

(अधिगमसम्प्राप्तिः – लेखनक्षमतावृद्धिः आत्मविश्वासश्च।)

**त्रयोदशः पाठः – ''क्षितौ राजते भारतस्वर्णभूमिः''**

❖ सस्वरगायनम्, श्लोकान्वयः शब्दार्थविवेचनम् भावस्पष्टीकरणम्।

❖ श्लोकाधारितप्रश्नोत्तराणामभ्यासः गृहकार्यम् च।

(अधिगमसम्प्राप्तिः – श्लोकानां सस्वरगायनं कुर्वन्ति देशस्य गौरवं च अनुभवन्ति।)

| |
|---|
| **चतुर्दशः पाठः – ''आर्यभटः'' ।**<br>❖ आदर्शवाचनम्, अनुवाचनम्, अभ्यासकार्यम् ।<br>❖ नैतिकमूल्यानां निर्देशः ।<br>❖ मति, गति, रति, प्रीति इत्यादीनाम् इकारान्त, स्त्रीलिङ्गशब्दानां सर्वविभक्तिषु प्रयोगः अभ्यासश्च ।<br>(अधिगमसम्प्राप्तिः – व्याकरणिकक्षमतावृद्धिः ।) |
| **पञ्चदशः पाठः – ''प्रहेलिकाः'' ।**<br>❖ सस्वरगायनम्, अनुवाचनम्, अभ्यासकार्यम् ।<br>❖ अन्यप्रहेलिकानां संग्रहः अभ्यासश्च करणीयः ।<br>(अधिगम सम्प्राप्तिः – तार्किकक्षमतायाः वृद्धिः ।) |
| **प्रथमसत्रीयपाठ्यक्रमस्य द्वितीयसत्रीयपाठ्यक्रमे समावेशः ।**<br>❖ प्रथमः पाठः – ''सुभाषितानि'' । अभ्यासकार्यम् ।<br>❖ द्वितीयः पाठः – ''बिलस्य वाणी न कदापि मे श्रुता'' । अभ्यासकार्यम् ।<br>❖ संधिप्रयोगः – दीर्घ–गुण–यण्–अयादि ।<br>❖ प्रत्ययप्रयोगः – क्त्वा–तुमुन्–ल्यप् ।<br>द्वितीय सत्र पाठ्यक्रमस्य पुनरावृत्तिः । आदर्शप्रश्नपत्राणाम् अभ्यासः परिचर्चा च ।<br>द्वितीयसत्रस्य परीक्षा । |